## Consciousness:
### Scientific and Philosophical Perspectives

Consciousness has remained an enigma even after close scientific and philosophical scrutiny. Lack of consensus about the nature, definition and taxonomy of consciousness and need of convincing evidences about the adequacy of the reductive methodology have directed scholars from different disciplines to study this multidimensional phenomenon from perspectives of their own. This dimension is focusing on ontological, epistemological, semantic and methodological debates on consciousness from scientific and philosophical perspectives. The volume comprises of articles highlighting consciousness in relation with Exploring Scientific Perspectives, Representations in Indian Philosophical Systems, Intentionality and Reflexivity - East and West, Phenomenological Perspectives - East and West etc., in English, Sanskrit and Hindi media. Rich content of information of the volume will particularly be useful to students and researchers in science and philosophy of world and consciousness studies.

Dept. of Vedanta
Sree Sankaracharya University of Sanskrit
Kalady, Ernakulam Dist, Kerala.

Consciousness:
Scientific and Philosophical
Perspectives

Dept. of Vedanta
Sree Sankaracharya University of Sanskrit

# CONSCIOUSNESS:
# SCIENTIFIC AND PHILOSOPHICAL PERSPECTIVES



**Consciousness:**
**Scientific and Philosophical Perspectives**
**Dr. K. V. Suresh**

**Department of Vedanta**
**Sree Sankaracharya University of Sanskrit**
**Kalady P.O., Ernakulam - 683574**
**Phone: 0484 2463380**
drsureshkv@gmail.com

**Printing:**
**Appoos Offset, Perumbavoor**

**Cover:**
**Jishnu Suresh**

**First Edition**
**© 2017**

**ISBN : 978-81-935487-0-7**

**Price: ₹ 300**

# FOREWORD

I have been watching with enthusiasm the efforts done by my colleagues in the Deparment of Vedanta, Sree Sankaracharya University of Sanskrit, Kalady, to take their department to the forefront of activities in the University. As the University has been established in the name of the greatest philosopher of India who stands out unique among the philosophers of the world with his universal philosophy of Advaita, the foremost branch of Vedanta, they have the right and responsibility to make his ideas intelligible to the modern society. The seminars conducted by the Department are mostly directed to fulfill this expectation. The present book, ***CONSCIOUSNESS : SCIENTIFIC AND PHILOSOPHICAL PERSPECTIVES,*** is the compilation of research papers presented at such a seminar.

Philosophers and scientists have been engaged for a long period to find out the fundamental reality of the world. The origin of the Universe is still an enigma, though there are diifferent theories put forth by scientists. The nature of the Universe is ever changing with gradual evolution. We observe two kinds of entities in the world - the living and the non-living. The Upaniṣads declared in the prehistoric past that there is only one Reality, which was called Brahman by the *Ṛṣis*. The schools of Vedānta have retained the name, but interpreted its nature in different ways to suit to their views. The traditional view properly examined points towards the oneness of the living principle in animals including human beings and the plants, but keeping out the non-living separately. The living principle is Life which is characteried by Consciousness. The Upaniṣads and the philosophers following them delare that Brahman is *Sat* (Real), *Cit* (Conscious) and *Ānanda* (bliss). Taking consciousness as the characteristic of Life, it is strongly argued that it is the only reality which transcends all the trancient things. This consciousness was considered by some to pervade only the human

# CONTENTS

**Foreword** i
**Preface** iii

1. वेदान्ते चैतन्यम् 1
   Dr. V. Ramakrishna Bhatt
2. EXPERIENCING THE FICTIONAL WORLD IN LITERATURE: CONSCIOUSNESS AND THE IMAGINATIVE PROCESS 6
   Dr. T. Vasudevan
3. CONSCIOUSNESS AS EXPOUNDED IN VARIOUS UPANIṢADS 18
   Dr. B. Chandrika
4. INQUIRY OF SUBJECTIVITY IN ADVAITA VEDĀNTA: APHENOMENOLOGICAL APPROACH 26
   Prof. Sreekala M. Nair
5. ŚRĪ BRAHMĀNANDA SWĀMI ŚIVAYOGI'S CONCEPT OF CONSCIOUSNESS 36
   Dr. A. Girija
6. REALITY AND CONSCIOUSNESS 41
   Dr. V. R. Muralidharan
7. विशिष्टाद्वैतवेदान्ते चैतन्यम्। 46
   Dr. M. S. Muraleedharan Pillai
8. CONSCIOUSNESS: THE PIVOTAL TENET IN ADVAITA 50
   Dr. K. Remadevi Amma
9. CONSCIOUSNES : NYĀYA-VAIŚESIKA PERSPECTIVES 56
   Dr. K. G. Kumary
10. GNOSIS AND TRUTH - AN EXISTENTIAL INQUIRY 61
    Dr. S. Sureshkumar
11. CONSCIOUSNESS- FOUNDATIONAL AS TRANSCENDENTAL 70
    Dr. Unnikrishnan P.
12. PHILOSOPHY OF CONSCIOUSNESS: CONCEPTS AND THEORIES 75
    Dr. Babu M. N.
13. NĀDA AND NĀDABRAHMA CONCEPT IN MUSIC 85
    Dr. Manju Gopal
14. CONSCIOUSNESS:POSTULATIONS OF MODERN SCIENCE AND GURU'S PHILOSOPHY 89
    Dr. S. Sheeba
15. ADVAITIC CONCEPT OF CONSCIOUSNESS AS REVEALED IN THE POTTAN THEYYAM THOTTAM 98
    Dr. T. G. Sreekumar
16. CONSCIOUSNESS: THE STRUCTURAL CONCORD IN QUANTUM PHYSICS AND PHILOSOPHY 102
    Dr. K.V. Suresh

## विशिष्टाद्वैतवेदान्ते चैतन्यम्।

**Dr. M.S Muraleedharan Pillai**

भारतीयदर्शनानां सर्वेषां परमलक्ष्यं तु परमपुरुषार्थप्राप्तिः। तत्प्राप्त्युपकारकाणि चेतनाचेतनादीनि बहूनि तत्त्वानि तत्तद्दर्शनानि प्रतिपादयन्ति। तत्र प्राधान्यं निर्वहति चेतनः। चेतन एव आत्मा। आत्मनः स्वरूपविषये मतभेदो दृश्यते। शून्यमिति माध्यमिकाः, क्षणिकविज्ञानमिति सुगताः, देहभिन्नः देहपरिमाणः इति जैनाः, कर्ता भोक्ता जडोविभुरिति वैशेषिकतार्किकप्राभाकराः, भोक्तैव केवलबोधात्मक इति सांख्यायोगिनश्च। वेदान्तेऽपि सम्प्रदायभेदात् आत्मस्वरूपभेद उपपद्यते। तेषु चेतनात्मकस्यात्मनः स्वरूपे विशिष्टाद्वैतवेदान्ते रामानुजाचार्याणां मतं पश्यामः।

तत्रादौ विशिष्टाद्वैतत्वम्। सुक्ष्मचिदचिद्विशिष्टं भवति तद्ब्रह्म। सुक्ष्मचेतनाचेतना विशिष्टमित्यपि वक्तुं शक्यते। आत्मा तु चेतन इति 'नासतो विद्यते भावः' इति श्लोकस्य श्रीभाष्ये 'देहस्याचिद्वस्तुन असत्त्वमेव स्वरूपम्। आत्मनः चेतनस्य सत्त्वमेव स्वरूपम्'[1] इति। अर्थात् आत्मनः चेतनस्य धर्मः चैतन्यम्। चेतनस्य भावः चैतन्यम्। अपि च 'चेतनत्वं नाम ज्ञानाश्रयत्वम्'[2] इति यतीन्द्रमतदीपिकाकारः। चेतनस्य भावः चेतनत्वम्। घटस्यभाव घटत्वमितिवत्।

चैतन्यत्वं चेतनत्वं चेत्युभयधर्मस्तुवर्तते आत्मनि। चेतनत्वं ज्ञानमेवेत्युच्यते चेत् न विरोधः। धर्मभूतज्ञानं नित्यं विद्यते चेतने आत्मनि। ईश्वरलक्षणं प्रदर्शिनं 'सर्वेश्वरत्वम्'[3] 'सर्वशेषित्वम्'[3] इत्यादि ईश्वरः आत्मा। आत्मा तु स्वयं ज्ञानरूपः। धर्मिणि आत्मनि वर्तमानत्वात् ज्ञानस्य धर्मभूतज्ञानमिति विशिष्टाद्वैतिनः व्यवहरन्ति। ज्ञानाश्रयत्वमात्मनि अस्ति। संवित् बुद्धिरित्यादिनाम्ना तदेव ज्ञानं गृह्यते। आत्मरूपत्वात् धर्मभूतज्ञानमपि नित्यम्।

स्वयंप्रकाशत्वे सति अचेतनद्रव्यत्वे सति सविषयत्वमिति लक्षणं तस्य तादृशज्ञानस्य। ईश्वरस्य नित्यानां च धर्मभूतज्ञानं नित्यं विभु द्रव्यं च।

बद्धानां तिरोहितम्। मुक्तानां पूर्वं तिरोहितमनन्तरमाविर्भूतम्। ज्ञानस्य नित्यत्वे ज्ञानमुत्पन्नम् नष्टमिति व्यवहारो लोके योऽस्ति स संकोचविकासावस्थामादाय ज्ञानस्योपपद्यते। सर्पकुण्डलवत् संकोचविकासौ ज्ञानस्य वर्तते। इन्द्रियार्थसंन्निकर्ष जन्यं ज्ञानं प्रत्यक्षमिति विशिष्टाद्वैतिनां न लक्षणम्। किन्तु यथावस्थित व्यवहारानुगुण



ज्ञानावस्थायां प्रयोजकः तादृशसन्निकर्षः इति वक्तुं शक्यते। नित्यत्वात् ज्ञानस्य जन्यत्वं कथमपि न सिद्ध्यति। 'ज्ञोऽतएव' इति सूत्रस्य श्रीभाष्ये – एवं प्राप्ते प्रचक्ष्महे 'ज्ञः' अत एव।[4] एवमात्मा ज्ञातृस्वरूप एव। न ज्ञानमात्रम्। नापि जडस्वरूपः। कुतः? श्रुतेः छान्दोग्ये 'अथ यो वेदेदं जिघ्राणीति स आत्मा'[5] इत्यादि। इत्थञ्च नित्यात्मनो धर्मभूतज्ञानमपि नित्यमिति सिद्धम्। तज्ज्ञानं स्वयं प्रकाशरूपम्। अन्यच्च धर्मभूतज्ञानं आत्मनः गुणः सत् द्रव्यमिति ते विशिष्टाद्वैतिनः। संकोचविकासावस्था तु द्रव्यस्यैव, ज्ञाने च सावस्था अस्ति चेत् ज्ञानस्य द्रव्यत्वमङ्गीकर्त्तव्यम्। ज्ञानं यद्यपि गुणपदार्थः, तथापि द्रव्ये वर्तमाना सङ्कोचविकासावस्था ज्ञाने सत्वात् तस्य द्रव्यत्वमङ्गीकुर्वन्ति। 'प्रभावत्'। एकस्यैव गुणत्वद्रव्यत्वे न विरोधः। अवस्थाश्रयो भवति द्रव्यम्।

ज्ञानं द्रव्यमित्यत्रानुमानप्रमाणं प्रदर्शयन्ति 'गुणभूतबुद्धिः द्रव्यत्वम् प्रसारणादिमत्त्वात्'। प्रभावत्। ज्ञानं द्रव्यम् संयोगादृष्टान्यत्वे सति भावनाकारणत्वात् आत्मवत्।[6] मतिः, प्रज्ञा, संवित्, धिषणा, धीर्मनीषा, शेमुषी, मेधा, बुद्धिरित्यादयः शब्दाः ज्ञानपर्यायाः। उपादिभेदात् बुद्धिरेव सुखदुःखेच्छाद्वेष प्रयत्नरुपा भवति। इच्छामि, द्वेष्मीति व्यवहारस्य स्मरामीतिवत् ज्ञानविशेषोपपत्तिरुपपद्यते। तथा सति। श्रद्धा, धृति,अधृतिः, हीः,धीः भीः इत्येदत् सर्वं मन एव 'कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरघृतिर्ह्रीर्धीर्भिरित्येतत् सर्वं मन एव।[7] इति श्रुतिविरोधाशङ्कां परिहरति – ज्ञानस्य मनः सहकारित्वात् नियमात् मन एवेत्युपचारादुक्तमितिवदन्ति ते विशिष्टाद्वैतिनः।

धर्मभूतज्ञानस्यानन्ता भवन्ति अवस्थाविशेषाः। 'ज्ञानशक्तिबलैशवर्यतेजः... शौर्यपराक्रमादयः कल्याणगुणाश्चानन्ताईश्वरस्य'।[8] आत्मरूपं धर्मज्ञानमित्यत 'विद्या विनयसम्पन्ने ... पण्डिताः समदर्शिनः' इति गीतायाः श्रीभाव्ये – विद्याविनयसम्पन्ने ब्राह्मणे – गोहस्तिश्वपचादिषु अत्यन्तविषमाकारतया प्रतीयमानेषु चात्मसु पण्डिताः - आत्मा – याथात्म्यविदो ज्ञानैकाकारतया सर्वत्र समदर्शिनः।[9] विषमाकारस्तु प्रकृतेः, न आत्मनः, आत्मा तु ज्ञानैकाकारतया सम इति पश्यन्तीत्यर्थः' इति। एवमेव 'सर्वभूतस्थितं यो आत्मौपम्येन सर्वत्र इति श्लोकयोः श्रीभाष्ये असंकुचित ज्ञानैकाकारतया एकत्वम्, असंकुचितज्ञानैकाकारतया औपम्येन इत्यादि[10] अपि च प्रत्यक्षानुमानागमस्मृतिसंशयनिर्णय विपर्यय विवेकव्यवसायमोहरागद्वेषमदमात्सर्य धैर्यदम्भलोभ, क्रोधादय सर्वे धर्मभूतज्ञानस्यैवावस्थाविशेषाः।

धर्मभूतज्ञानाश्रयः आत्मा तु नित्यः - नैनं छिन्दन्ति शस्त्राणि इति गीता क्षीभाष्ये – नैनं - शास्त्रा- ग्नयम्बु वायवः छेदन, दहन, क्लेद, शोषणानि आत्मानं

अचलः, अजः, सनातनः, स्थिरस्वभावः, अप्रकम्प्यः, पुरातनः इत्यादि।[11] 'न जायते न म्रियते' इति श्लोकभूमिकायां श्रीभाष्ये- उक्तैरेवहेतुभिः नित्यत्वात्, अपरिणामित्वात्, आत्मनः जननमरणादयः सर्व एव अचेतनदेहधर्मा न सन्ति'।[12] पुनः श्रीभाष्ये - आत्मा तु अविनाशी, कुतः अप्रमेयत्वात् न हि आत्माप्रमेयतया उपलभ्यते। अपि तु प्रमातृतया। न देहादेः प्रदेशभेदं प्रमातुः आकारभेद उपलभ्यते। अत एकरूपत्वेन अनुपचयात्मत्वात् प्रमातृत्वात् व्यापकत्वाच्च आत्मा नित्यः इत्यर्थः।[13]

अन्यश्च आत्मा अणुपरिमाणः इति सिद्धान्तः तेषाम्। तत्र प्रमाणं— एषोऽणुरात्मा चेतसा वेदतव्यो यस्मिन्— 'प्राणः पञ्चधा संविवेश' इति श्रुतिरेव।[14] 'स्वशब्दोन्मानाभ्यां च' इति सूत्रश्रीभाष्ये रामानुजाचार्यः 'साक्षात् अणुशब्द श्रुयते। एषोऽणुरात्माचेतसा वेदिव्यो उदृत्यमानं उन्मानम्'[15] इति। एवं उत्क्रान्तिगत्यगतीनाम् इति सूत्रश्रीभाष्ये च नायं सर्वगतः, अपि तु अणुरेवायमात्मा।[16] कुतः उत्क्रान्तिगत्यगतीनां श्रुतेः। उत्क्रान्तिस्तावत् श्रूयते 'तेन प्रधोतेनैष आत्मा निष्कामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः'[17] इति। गतिरपि ये वै के च अस्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति[18] इति। कौषीतकी उपदिषदाम् अगतिरपि— 'तस्माल्लोकात् पुनरेति अस्मै लोकायकर्मणे'[19] इति। विभुत्वेहयेना उत्क्रान्त्यादयो नोपपद्येरन् इति। सारंशः - यदि आत्मा विभुश्चेति, विश्वो आत्मनः क्रियादिरहितत्वात् श्रुतिप्रोक्त उत्क्रान्त्यादय आत्मनः कथं सम्भवन्ति? अतः श्रुतिप्रोक्त उत्प्रामाण्यात् आत्मन - उत्क्रान्त्यादयः सन्ति इति अभ्युपगच्छन्ति ते। विभुत्वं आत्मनि नास्ति। अणुत्व सत्त्वात् आत्मनि उत्क्रान्त्यादय सुलभा भवेयुः। अत अणुपरिमाणक आत्मा।

अपि च श्रीमन्नारायणं ब्रह्म आत्मशब्दरव्यातं जगत्कारणमिति श्रीरामानुजाचार्याणां मतम्। प्रधानमेव जगत्कारणमितिः सांख्यमतं निराकुर्वन्ति रामानुजचार्याः। अपि तु निरस्तसमस्ताविद्यादि दोषगन्धः अनवधिकातिशयासंख्येय कल्याणगुणगणनिधिः निखिल जगदेककारणभूतः पुरुषेत्तम अभिधीयते। कुतः यस्य वै तत्कर्म इति कौषीदकि उपनिषदाम् इत्यत्र एनच्छब्दान्तितस्य कर्मशब्दस्य परमपुरुषकार्यभूत ब्रह्म चिदचिद्वस्तुशरीरमितिसूक्ष्मचिद चिद्वस्तुशरीरं ब्रह्मकारणम् तदेव ब्रह्म स्थूलचिदचिद्वस्तु शरीरं जगदाख्यं कार्यमिति जगद्ब्रह्मणः सामानाधिकरण्योपपत्तिः, जगतो ब्रह्मकार्यत्वम्, ब्रह्मण अनन्यत्वम्। अचिद्वस्तुनो जीवस्य च ब्रह्मण च परिणामित्वं दुःखित्वं कल्याणगुणकरत्वं स्वभावासंकरः सर्वश्रुत्यविरोधश्च भवति। सदेव सोम्येदमग्र आसीत् एकमेव इति अविभागावस्थायामव्यक्तजीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेण अवस्थानमवश्यापगन्तव्यम्। अतो ब्रह्मकारणत्वं सम्भवत्येव इति।



प्रतिशरीरं भिन्न आत्मा, अनेकः सुखरूपी, तथापि उपाधिवशात् संसरति। कर्तृत्वभोक्तृत्वादिकं भजते। एतत्सर्वं विशिष्टाद्वैतवेदान्ताभिमतपरम्। तत्र चैतन्य विषये विचारः कः इति लेखने किञ्चित् प्रकाशितः। लेखनं तु सम्पादकस्याधीनं भवति। ज्ञानाश्रय आत्मा इति उक्त्वात् ज्ञानावगमेन सह आत्मापि अवगन्तव्यः इति तद्विषयेऽपि स्वल्पप्रकाशो दर्शितः।

सर्वे आस्तिकनास्तिकदार्शनिकाः चैतन्यं किमस्ति इति अङ्गीकुर्वन्त्येव। परन्तु तत्तत्सिद्धान्तानुरोधेन चैतन्यस्य निर्वचनं भिन्नमस्ति। तत्र कदाचित् विरोधो वा अविरोधो वा अस्तीति किमुवक्तव्यम् तन्तन्मते चैतन्यं कदाचित् नित्यं, अनित्यं, एकं वा अनेकं परप्रकाश्यं, स्वयंप्रकाश्यं इत्यादि विचारा भवन्त्येव। किन्तु चैतन्यं नास्त्येवेति कोऽपिदार्शनिकः न वदेदिति मे मतिः।। इति।

**प्रदर्शितग्रन्थसूची**


१. श्रीमद्भगद्गीता श्रीरामानुज श्रीभाष्यम्, २.२६.
२. यदीन्द्रमतदीपिका, Ramakrishnana math Mylapoor, स्वामिअदिदेवानन्द पृ.१०३
3. Ibid - पृ.१२३
४. ब्रह्मसूत्ररामानुजश्रीभाष्यम्, २.३.१९.
५. छान्दोग्योपनिषत् -८.१२
६. यदीन्द्रमतदीपिका पृ.९०
७. बृहदारण्यकोपनिषत् १-५.३
८. यदीन्द्रमतदीपिका पृ.९२
९. श्रीमद्भगवद्गीता श्रीरामानुजश्रीभाष्यम् -५.१८
१०. Ibid - ६.३१,३२
११. Ibid - २.२३,२४
१२. Ibid - २.२०
१३. Ibid - २.१८
१४.मुण्डकोपनिषत् ३.१.
१५.ब्रह्मसूत्ररामानुजश्रीभाष्यम् २.३.२३
१६.Ibid - २.३.२०
१७.बृहदारण्यकोपनिषत् –4-8-6
१८. Ibid -4-8-4
१९.छान्देग्योपनिषत् – ६.२